This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

॥१॥

श्रीगणेशाय नमः॥ श्रीदक्षिणामूर्तये नमः॥
अनंताख्यगुरुं नौमि कवित्वप्रतिभाकरं॥ शास्त्र
वल्लीजलधरं स्फुरत्कीर्तिकरं परं॥१॥ अनाद्याया
खिलाद्याय मायिने गतमायिने॥ अरूपाय सरूपा
य दक्षिणामूर्तये नमः॥२॥ नमः शिवाय शांताय का
रणत्रयहेतवे॥ निवेदयामि चात्मानं त्वं गतिः परमे
श्वर॥३॥ नत्वा श्रीशंकराचार्यचरणांभोरुहद्वयं॥
काशीनाथः प्रतनुते शिवभक्तिरसायनं॥४॥ तत्र शि
वभक्तिर्द्विविधा॥ मुख्या गौणी चेति॥ तत्रेश्वरविषय
कोनुरागाख्यचित्तवृत्तिविशेषो मुख्या भक्तिः॥ तथा
च भक्तिमीमांसासूत्रं॥ सा परानुरक्तिरीश्वरे॥ ईश्वरः
शिव इति॥ तथा च शिवरहस्ये॥ ईश्वरः शिव इति वेद वे१

॥१॥

स्यैव श्रुतिस्ततः॥ सर्वभावेन सततं भजनीयो महेश्व न१
रः॥ महादेवं विहायान्यं सुरं यः समुपासते॥ समू
र्ख इति विज्ञेयः सत्यं सत्यं न संशयः॥ यः शंकरं वि
हायान्यं सुरमर्चितुमिच्छति॥ समुखस्थां सुधां
त्यक्त्वा क्षारांभः पातुमिच्छति॥ यः शंकरं समालो
क्य न स्तोत्रं कर्तुमिच्छति॥ सऍ दुर्भगो भाग्यः स व६
पापोपभाजनं॥ यः शंकरं समालोक्य प्रणामान्
न करिष्यति॥ स दग्धदेह इत्येव ज्ञेयः पापकुलाश्र
यः॥ यः शंकरार्चनध्याननतिस्तुतिर[illegible]तः सदा
तस्यैव जननी धन्या जन्म तस्यैव सार्थकं॥ यस्य सां
बे महादेवे संसक्तं चित्तमन्वहं॥ तस्यैव हि पिताध
न्यस्तस्यैव कुलमुन्नतमिति॥ अमरकोशेपि॥ शं

Acc.No. - ~~2929~~ M859

Title - शिवभक्तिरसायन

Sub - भक्ति.

Author - काशीनाथ भट्ट.

पत्रे - 56.

Checked 2012

K K S U LIBRARY
RAMTEK
441 106
M-859
Dist Nagpur

7

भुरीशः पशुपतिः शिवः शूली महेश्वरः॥ ईश्वरः
शर्व ईशानः शंकरश्चंद्रशेखर इति। पशुपतिरिति।
पशूनामाब्रह्मस्तंबपर्यंतानां पतिः नायकः पशु
पतिः॥ तथा च स्कांदे। ब्रह्माद्यास्तंबपर्यंताः पश
वः परिकीर्तिताः। तेषां हि नायको यस्मात् शिवः
पशुपतिः स्मृत इति॥ अथातो भक्तिजिज्ञासेति
सूत्रोपात्ता भक्तिस्तत्स्वरार्थः। तस्याः परेति विशेष
मुख्यां णं। परां भक्तिमुद्दिश्य अनुरक्तिर्लक्षणत्वेन विधी
यत इति तदर्थः॥ कैवल्योपनिषदि। श्रद्धाभक्तिः
ध्यानयोगादवेहीति॥ शिवतत्त्वविषयास्तिक्य
बुद्धिः श्रद्धा॥ भक्तिः शिवभक्तिः॥ सा च भक्तिस्त्रि
धा। मानसी। वाचिकी। कायिकी च। तथा च लिंग

पुराणे। तस्मात्सेवा बुधैः प्रोक्ता भक्तिशब्देन भूय
सी॥ भजनं भक्तिरित्युक्तं वाङ्मनःकायकर्मभि
रिति॥ गारुडपुराणेपि॥ भज इत्येष वै धातुः से
वायां परिकीर्तितः॥ तस्मात्सेवा बुधैः प्रोक्ता भक्तिः
साधनभूयसीति॥ तद्भेदाः स्मरणकीर्तनादयो
बहवः। प्रवेष्टुं च परंतपेति श्रीविष्णुवचनं॥ अत्र प्र
वेष्टुमित्यनेन शिवभावाख्यो मोक्ष उच्यते। सोपि शि
वभक्त्यैव लभ्यत इत्यर्थः॥ अत एव भक्तिमीमांसायां
तत्संस्थस्यामृतत्वोपदेशादिति। तथा च स्कांदे॥
यश्रुभीन्निगीतः पुत्रः शिवभक्तिरतो भवेत्॥ तदेव कुल
मुत्कृष्टं धन्य इत्यपि मन्महे॥ यस्मिन्कुले समुत्पन्नः शि
वपूजापरो भवेत्॥ किमत्र बहुनोक्तेन शिवभक्तिर्मुमु

॥३॥

क्षुभुरिति॥ निस्समभ्यभिचारेण कर्तव्या सत्यमुच्यते॥
कश्यप उवाच॥ इत्येतं स्कारवचः श्रुत्वा विप्रमुख्यास्तमादयः सु
राः॥ शिवभक्तिरताः संतः स्तपस्त्रिपुर्दुरासदं॥ पश्यैतान्
शंकरान् प्रथन्यान्महेशाराधनोत्सुकान्॥ एतेषां शंकरा
दन्यः पूज्यो नास्त्येव सर्वथा॥ शिवान्यं नार्चयंत्येते स्वप्ने
पि शिवतत्पराः॥ न नमंति च मोहेनाप्यशिवं संस्थितव्र
ताः॥ भजंति चंद्ररेखांकं त्रिशूलांकं महेश्वरं॥ बिल्वप
त्रादिभिः सम्यक् पूजयंति स्तुवंति च॥ शिवलिंगं पूजयं
ति प्रणमंति स्तुवंति च॥ पश्यंति च प्रयत्नेन शिवलिंगं
समर्चितं॥ एते सर्वेप्यनेनैव जन्मना शिवपूजकाः॥
शापमुक्ता भविष्यंति महेशानुग्रहान्मुने इति॥ कौर्मे
प पि शिव उवाच॥ त्यक्त्वान्यभक्तिं मदनुग्रहेण मामेव
ये संततमर्चयंति॥ तेभ्यः शिवेभीप्सितमर्थमीशो दा

॥३॥

स्यामि तेभ्यो भक्तजनाभिसेव्यः॥ स्कांदे॥ कीर्तनीयो म
हादेवो जिह्वया पुण्य[illegible]तया॥ महेशकीर्तनं यस्मा
न्महापातकनाशनं॥ भुक्तिमुक्तिप्रदे पुण्ये शिवश्रवण
कीर्तने॥ ततस्सोयत्नतः कार्यो ब्राह्मणाद्यैर्मुमुक्षुभिरि
ति॥ शिवरहस्येपि॥ दुर्लभा दुर्लभानंदिन् शिवभक्तिर्न
संशयः॥ सा मुक्तिदायिनी भक्तिः शैवी पा[illegible]ऽनन्य
संश्रया॥ श्रध्ययानन्यगामिन्या मुक्तिर्भवति सर्वथा॥ श्र
धा शिवे हि कर्तव्या सैव मुक्तिप्रदायिनी॥ शैवी श्रधा कै
ल्यवस्त्रश्रधा सा कामदुग्ध्रुवं॥ सा मोक्षफलदा तस्मात्
शिवे श्रधाति दुर्लभा॥ महेश्वरश्रधयैव मुक्तिः प्राप्या ज
नैर्यतः॥ तस्मान्महेश एवैष श्रधा कार्या प्रयत्नतः॥ महा
दानानि यज्ञाश्च ये च सर्वे स्वदक्षिणाः॥ तपांसि यानि घो
राणि तपांसि फलदः शिवः॥ कौर्म्ये॥ येनानंताः कृताः

सम्यगस्वमेध्याः शिवप्रिये॥ तेनैव शैवी संप्राप्यात्र
ध्यानान्येन सर्वथा॥ तपांसि येन चोग्राणि कृता
नि बहुध्या मुदा॥ तेनैव शैवी संप्राप्या अध्यानान्ये
न सर्वथा॥ किमुक्तेनात्र बहुना महद्भाग्येन शांभ
वी॥ भक्तिर्भवति नाल्पेन भाग्येनैतत् ध्रुवं ध्रुवमि
मिति॥ रामायणे॥ भक्तिस्त्रैविध्याद्भक्तस्यापि त्रैवि
ध्यं॥ तत्र तामसं भक्तमाह॥ रामायणे॥ यस्तु हिंसां
समुद्दिश्य दंभं मात्सर्यमेव च॥ भेददृष्टिश्च संरंभी भ
क्तो मे तामसः स्मृतः॥ अस्यार्थः॥ दंभं पूजालाभा
दिफलकं॥ मात्सर्यं परगुणादेर्या भेददृष्टिः अरिमि
त्रादिदृष्टिः॥ राजसं भक्त भक्तमाह॥ फलाभिसंधि

भोगार्थी य्यन कामो यशस्तथा॥ अर्चादौ भेदबुध्या मां
पूजयेत्स तु राजसः॥ अस्यार्थः॥ भोगः ऐहिकः॥ अर्चा
दौ प्रतिमादौ॥ आदिना स्थंडिलादिपूजास्थानसंग्रहः॥
भेदबुध्या॥ सात्विकं भक्तमाह॥ परस्मिन् अर्पितं यस्तु
कर्म निर्हरणाय वा॥ कर्तव्यमिति वा कुर्यात् भेदबुध्या स
सात्विकः॥ अस्यार्थः॥ परस्मिन् मयि अर्पितं भगवतः प्रे
रणया मया कृतं तेन स एव तुष्यत्विति बुध्विश्वरार्पणं॥
निर्हरणाय॥ पापनाशाय॥ एतत्फलीभूतं निर्गुणभ
क्तियोगदृष्टांतः यथा गंगांबुनोंबुध्यौऽति अनेनाभेदवि
षयत्वं मनोवृत्तेर्दर्शितं॥ ७॥ लक्षणमाह॥ मद्गुणश्रवणा
देव मय्यनंतगुणालये॥ अविच्छिन्ना मनोवृत्तिर्यथा गं
गांबुनोंबुधौ॥ तदेव भक्तियोगस्य लक्षणं निर्गुणस्य

हि॥अस्यार्थः॥अविछिन्नामनोवृत्तिरिसंतेनअनंतगु
णालयेमयियाविछिन्नमनोवृत्तिरेतत्सगुणध्यानस्य
प निर्गुणध्यानस्यलक्षणप्रोक्तं॥पाद्मेनारायणः॥देव
तासार्वभौमस्तुशंकरःसर्वकामदः॥धर्मार्थकाममोक्षा
णांदातासांबशिवःस्वयं॥शंकरोविष्णुतपसासंतुष्टोवि
ष्णवेमुदा॥ददौवैकुंठभुवनंततोदेवोत्तमःशिवः॥अन्येभ्यो
पिचदेवेभ्यःप्रीतःतत्तपसाशिवः॥लोकान्निष्टान्ददौ
पूर्वमतोदेवोत्तमःशिवः॥वेदाःसर्वेमहादेवंस्तुवंतिविवि
धामुदा॥तदन्येनस्तुवंत्येवमतोदेवोत्तमःशिवः॥यथाश्रे
ष्ठोमनुष्येषुब्राह्मणोब्रह्मवित्तमः॥तथादेवेषुसर्वेषुश्रेष्ठः
सांबःशिवप्रभुः॥उमयासहितोदेवःसोमइत्यभिधीय
ते॥उमाज्ञानमयीशक्तिःसैवविद्येतिगीयते॥विद्येति
मोक्षप्रदज्ञानस्वरूपत्वाद्विद्या॥विद्याःसर्वास्सुमार

पाविद्यानामीश्वरःशिवः॥विद्यापतिर्नदेवोन्यो
विद्यान्यत्रनयाध्रुवं॥ईशानःसर्वविद्यानांभूताना
मीश्वरःशिवः॥विष्णुर्ब्रह्मादिदेवानांप्रभुःसांबःस
दाशिवइति॥स्कांदेपि॥विष्णोरप्यजनितासोमोब्र
ह्मणःपवनस्यच॥आकाशस्यापिजनिताउषधी
नामपामपि॥तथाचबृहज्जाबालोपनिषदि॥ब्रह्मा
सोमोहंपवनःसोमोहंसोमःपवतेजनितामतीनां
सोमोहंजनितादिवः॥सोमोहंजनितापृथिव्याःसोमो
हंजनिताग्नेःसोमोहंजनितासूर्यस्यसोमोहंजनितेंद्र
स्यसोमोहंजनितोतविष्णोःसोमहंजनितामनश्चंद्र
मसोर्येदानांभुर्वेभूत्सुयारादीनांसर्वेषांलोकानांचवि
श्वंभूतंभुवनंचित्रंबहुधाजातंजायमानंचयत्तत्सर्वं

स्य सोमोहमेव जनिता इति ॥ काशीखंडे ॥ देवदेव महा
देव शंभो शिव शिवेति च ॥ धूर्जटे नीलकंठेश पिनाकि
न् शशिशेखर ॥ त्रिशूलपाणे विश्वेश रक्ष रक्षेति भाषणै
रिति ॥ कौर्मे ॥ एवंविधे कलियुगे दोषाणामेकशोधनं ॥
महादेवनमस्कारः ध्यानं दानमिति स्मृतिः ॥ अथ ध्यान
योगमाह ॥ शारीरकभाष्ये ॥ अस्ति तावत् नित्यशुद्धबु
द्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितमिति ॥ अ
त्र यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासन्शिव एव के
वलमिति श्रुतेः ॥ अमूर्तेन स्वमूर्तिस्तु तेनाकल्पि[illegible]
स्वलीलया ॥ सर्वैश्वर्यगुणोपेता सर्वज्ञानमयी शुभा ॥
सर्वगा सर्वरूपा च सर्वदृक् सर्वकारिणी ॥ सर्वैकवंद्या
सर्वाद्या सर्वदा सर्वसंहृतिः ॥ परिकल्प्येति तां मूर्तिमी

श्वरी शुद्धरूपिणी ॥ अंतर्दध्ये पराख्यं यद्ब्रह्म सर्वगमव्य
यं ॥ अमूर्तं यत्पराख्यं वै तस्य मूर्तिरहं प्रिये ॥ अर्वाचीनप
राचीनाम्नीश्वरं मां जगुर्बुधाः ॥ इत्यादिश्लोकैस्तस्या मूर्त
स्य शिवस्य लोकानुग्रहार्थं लीलागृहीतां द्वितीयां मूर्तिं
सूतसंहितायां ॥ उमार्द्धविग्रहा शुद्धा त्रिनेत्रा चंद्रशेखरा ।
नीलग्रीवा परानंदप्रमोदा तांडवप्रिया ॥ ब्रह्मविष्णुमहारु
द्ररूपास्या गुणमूर्तिभिः ॥ सर्वमूर्तिविहीनस्य सर्वभूता
धिपस्य च ॥ तथाप्येषा परा मूर्तिरित्येषा शाश्वता श्रुतिरि
ति ॥ शैवपुराणे ॥ यः शिवः सर्वभूतानामीश्वरः स्वत एव
तु ॥ ईश्वरः सर्वविद्यानां स एवादिगुरुर्बुधः ॥ तस्य शिष्या
महाविष्णुः सर्वज्ञानमहोदधिः ॥ तस्मादस्य परिज्ञातो
ब्रह्मा सर्वजगत्प्रभुरिति ॥ श्वेताश्वतरोपनिषदि ॥ तमी
श्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतं ॥ प

तिंपतीनांपरमंपरस्ताद्विदामदेवंभुवनेशमीड्यं॥नतस्य
कार्यंकरणंचविद्यतेनतत्समश्चाभ्यधिकश्चदृश्यते॥नत
स्यकश्चित्पतिरस्तिलोकेनचेशितानैवचतस्यलिंगमिति॥अ
थर्वशिखायां॥शिवएकोध्येयःशिवंकरःसर्वमन्यत्परित्यज्या
इतिशिवशब्दवाच्यस्यवस्तुनएवध्येयत्वमिति॥यज्ज्ञानान्मोक्ष
रूपंफलमुच्यते॥सनत्कुमारसंहितायांच॥त्रिलोकीमेकका
लंकायेमांध्यायंतिशंकरं॥नस्यमानंत्रयीनेत्रंचंद्रार्धकृतशेखरं
उमामहेश्वरं॥रूपंदक्षिणामूर्तिमेवच॥मृगटंकधरंदेवंनीलकं
ठमथापिवा॥पंचाननमयीमूर्तिंहृदिध्यायंतियेजनाः॥अनंता
मूर्तयःशंभोर्यत्रवारमतेमनः॥तामेवचिंतयेद्यस्तुसयातिपर
मांगतिमिति॥स्कांदेकाशीखंडे॥स्तुतयऊचुः॥तब्रह्मगुवाच॥
यदंतस्थानिभूतानियतःसर्वंप्रवर्तते॥यदाहुस्तत्परंतत्त्वंसरु
द्रस्त्वेकएवहि॥यजुरुवाच॥योयज्ञैरखिलैरीशोयोगेनचस
मिज्यते॥येनप्रमाणंहिवयंसएकःसर्वदृक्शिवः॥सामो

येनेदंभ्राम्यतेविश्वंयोगिभिर्योविचिंत्यते॥यद्भासा
भासतेविश्वंसएकस्त्र्यंबकःपरः॥अथर्वोवाच॥यं
प्रपश्यंतिदेवेशंभक्त्यानुग्राहिणोजनाः॥तमाहुरेकं
कैवल्यंशंकरंदुखतस्करंमिति॥ऋतुविष्णीउवाच॥
शिवयारममाणोसीपरब्रह्मशिवःकथं॥तदुदीरितमा
कर्ण्यप्रणवात्मासनातनः॥अमूर्तोमूर्तिमान्भूत्वाह
समानउवाचेतौ॥प्रणवउवाच॥नस्वैषभगवान्श
क्त्यास्वात्मनोव्यतिरिक्तया॥कदाचिद्रमतेरुद्रोलीलारूप चि
धरोहरः॥असौहिभगवानीशःस्वयंज्योतिःसनातनः॥
आनंदरूपातस्यैषाशक्तिर्नागंतुकीशिवा॥उक्तोप्येवंत
योर्निष्ठंनाज्ञातंशिवमायया॥इति॥बृहदारण्योपनिष
दि॥सइममेवात्मानंद्वेधापातयेततःपतिश्चपत्नीचा
भवतामिति॥शिवपुराणेपि॥परमात्माशिवःप्रोक्तो

॥८॥

शिवाशैवप्रकीर्तिता इति ॥ सूतसंहितायां ॥ अथ
परशिवभक्त्या सांद्रेदानंदपूर्णपरमशिवमनुस्मृय
स्वात्मरूपेण सूतः ॥ मुनिगणमवलोक्य प्राह साक्षा
द्गुणाब्धिर्जनपदाहितस्वरूपं वेदितव्यं नु किंचित्पूति ॥
शिवपुराणे ॥ वेदादौ यः स्वरः प्रोक्तो ॐकाराख्यो महेश्व
रः ॥ सृजते सर्वभूतानि पंचमूर्तिः सदाशिवः ॥ त
था च श्रुतिः ॥ यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः ॥
तस्य प्रकृतिलीनस्य यः परः स महेश्वर इति ॥ अस्यार्थः ॥
वेदाः नाम अग्निमीळे पुरोहितं इषे त्वोर्जे त्वा इत्यादिरूपक्र
म्य तस्मिन् उपक्रमे यः स्वरः यो वर्णः प्रणवरूपो अस्ति म
न्वस्वरः प्रणवो ध्यानकाले व्याकृते जगत्कारणे लानो भ
वति अकारोकारमकारेषु विराट् हिरण्यगर्भाव्याकृतानि
ध्यात्वा विराड्रूपमुकारे प्रविलाप्य तं चोकारं हिरण्यग

॥८॥

र्भरूपमूलप्रकृतिरूपे मकारे प्रविलापयेत् तस्य च प्रकृ
तौ लीनस्य प्रणवस्य यः परस्तु तुर्यमात्रारूपेण नादे ध्यात
व्य उत्कृष्टरूपोऽस्ति सोयं महेश्वरो विज्ञेयः ॥ सूतसंहिता
यां ॥ लीयमानमिदं सर्वं ब्रह्मण्येव हि लीयते ॥ न लीयते प
रं ब्रह्म सदा सत्यस्वभावतः ॥ तथा विष्णुश्च रुद्रस्य प्रकृतौ
च लयं गतौ ॥ माया तु प्रलये काले परस्मिन्परमेश्वरे ॥ सत्य
बोधसुखानंदब्रह्मरूपा[illegible]दिसंज्ञिते ॥ अत्र संसार
रुग्द्रावकत्वाद्रुद्रशब्दवाच्यं ब्रह्म ॥ पदं यस्य रमं [illegible] विधेशा
शदेवाखिलदेहिनां ॥ परं परं परममद्वैतं स शिवः सांबवि
ग्रहः ॥ स्कांदे ॥ क्रमेण लभ्यते ह्येषां मुक्तिराराधनाद्द्विजाः ॥
आराधनान्महेशस्य तस्मिन् जन्मनि मुच्यते ॥ शिवरहस्ये ॥
मल्लिंगार्चनतत्पराः हृदि सदा मामेव कार्यां मुदा ध्यायंते
मम नाम शंकर महादेवाखिलेशप्रभो ॥ गौरीनाथ शिवे
श्वरेति मम ले भक्त्या जपंतः परं सततं संस्मरंतमपास्तभो

॥९॥

गाविषयाः शैवाग्रगण्याः शिवे ॥ श्रीमद्रूदेवनामकेज
यरमभटसुतवाराणसीगर्भसंभवकाशीनाथविरचि
ते शिवभक्तिरसायने प्रथमोल्लासः ॥ ॐ अथ यच्छुद्धज्ञेयं
न तत्साक्षात्कारहेतुः किंतु उपासनारूपज्ञानमेव तथा
श्रूयते ॥ ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षी
तमसः परस्तादिति ॥ कैवल्योपनिषदि ॥ तथा च स्कां
दे सौरसंहितायां ॥ शिखाग्रे द्वादशांगुल्ये ब्रह्मरंध्रे
यचांबिके ॥ भ्रुवोर्मध्ये तथा तालौ कंठकूपे तथा हृदि ॥
नाभिकंदे तथाधारे ध्यायेत्सांबं त्रिलोचनं ॥ आधारे
ष्वपि चोक्तेषु भाविकं ज्योतिरूपकं ॥ ध्यायेन्मौनिस्थ
लानित्यं भोगमोक्षमवाप्नुयात् ॥ कालोत्तरे ॥ स्थिरलिंगेस
दा कार्यं सिद्धिकामैः प्रयत्नतः ॥ भुक्तिमुक्तिप्रदं पुंसां रु
चे लिंगे शिवार्चनं ॥ सर्वत्र संस्थितः पूज्यः सर्वाधारेषु

॥९॥

सर्वदा ॥ तथापि लिंगे भगवान् पूजां गृह्णाति धूर्जटिः ॥
ॐ संपूर्णा फला पूजा मंत्रद्रव्यक्रियागुणैः ॥ तथापि लिं
गे संपूर्णा पूजा भवति षण्मुख ॥ सौरसंहितायाम
पि ॥ पीठरूपहरिः शंभुर्लिंगरूपधरः परः ॥ शिवस्य ॥
शिवपूजापरो नित्यं शैवः शिवपरायणः ॥ नित्यलो
कवैकुंठे गणपत्यैव सर्वथा ॥ शिवनाम समं नाम ना
स्ति नास्ति न संशयः ॥ सत्यं सत्यं पुनः सत्यमुद्धृत्य भु
जमुच्यते ॥ सर्वदेवोत्तमं सांबं यो चयिष्यति शंकरं ॥ स
नमस्तु वशं याति सत्यं सत्यं न संशयः ॥ यस्तु बिल्वतरो
र्मूले मुख्यो [illegible] मस्तुं जयं जपन् ॥ तस्य मस्तु भयं नास्ति
सत्यं [illegible] सत्यं मयोच्यते ॥ बिल्वमूले महादेवं लिंगरू
पिणमास्तिकाः ॥ पूजयंत्यतियत्नेन मस्तु पापाविमुक्त
ये ॥ सिध्यंति संपदस्तस्य बिल्वमूले शिवार्चनात् ॥

॥२०॥

द्विजउवाच॥ममवैकुंठवासोवादेवइत्यभिनम्यतं॥
ततोविष्णुरुवाचेदंवचनंसुरसंनिधौ॥विप्रवैकुंठवा
सोपिमयादातुंनशक्यते॥अधिकारोमयाप्राप्तोवै
कुंठस्यशिवार्चनात्॥तुभ्यंवैकुंठवासोपिमयादातुं
नशक्यते॥शिवपूजांविनातत्रवाससत्वसंतदुर्लभः
स्वतंत्रःपार्वतीनाथःसर्वदेवशिखामणिः॥ससमा
राधितोभीष्टंप्रयच्छतिनसंशयः॥अस्यत्वंआवयंस
र्वेश्लाघ्यानात्रसंशयः॥स्कांदेशिवरहस्ये॥अस्ये
तद्दुर्लभंजन्मकलौप्राप्यापिमानुषं॥यदिनाराधयेत्
शंभुंतस्यजन्मनिरर्थकं॥शिवैकशरणोभक्ताकलौ
यदिवसेन्नरः॥तस्यमोक्षोभवत्येवसत्यंसत्यंमयोच्य
ते॥मोक्षोभवतिमर्त्यानांशंकरस्यैवपूजया॥सत्यंस
त्यंपुनःसत्यमुद्धृत्यभुजमुच्यते॥महादेवमहादेवम

॥२०॥

महादेवे२

हादेवेतिवादिनां॥वत्संगौरिवगौरीशोधावंतमनुधा
वति॥महादेवमहादेवेत्ययंध्वनिः॥सुधियोमुक्तिकां
तायाःपाणिग्रहणडिंडिमः॥महादेवमहादेवमहादे
वेत्ययंध्वनिः॥संसारबीजदावाग्निःसत्यंसत्यंनसंशयः॥
कोटयोब्रह्महत्यानांअगम्यागमकोटयः॥सद्यःप्रलयमा
यांतिमहादेवेतिकीर्तनात्॥महादेवेतिनामेदंयःशृणो
तिवदिष्यति॥नतस्यनरकावासंसत्यंसत्यंनसंशयः॥
भस्मोद्धूलितसर्वांगंमहादेवेतिवादिनं॥स्पृष्टुंशक्तःकथं
भृत्याकालमृत्युरपिस्व[illegible]यंमीति॥शिवरहस्ये॥यंयंदेवं
समुद्दिश्यनमस्काराःकृतानरैः॥तेसर्वेपिनमस्काराःप्र
विशंत्येवमांशिवमिति॥यंयंदेवंसमुद्दिश्ययायापूजाकृ
तामुदा॥सामय्यिप्रविशत्येवपूजासर्वापिसर्वदा॥मद
न्यःकर्मफलदःकथंभवितुमर्हति॥मत्तोपिमदधीना

॥११॥

स्तोविष्णुर्व्यापकरूदास्तुन॥ शैवपुराणे॥ शंकरार्चीरतं
शैवं दृष्ट्वा यो नाभिनंदति॥ न तस्मादधिकः पापी सत्यं
सत्यं न संशयः॥ शंकरार्चीरतं शैवं यो नार्चयति स्माद
घोरं रं॥ स याति नरकं यावदाचंद्रतारकं॥ अन्यदेवपरा दु
ष्टाः शंकरध्यानवर्जिताः॥ नष्टधर्मा दुराचारा भविष्यं
ति कलौ युगे॥ सर्वदेवोत्तमं सांबं महादेवमनामयं॥
अन्यदेवसमं ज्ञात्वा विनश्यंति कलौ युगे॥ रुद्राक्षधा
रणं स्यक्त्वाथ हस्ता बाले चोदितं॥ काष्ठमालालग्नकंठा
भविष्यंति कलौ युगे॥ श्रीरुद्रालंकृतान्वेदाननधीते
वदुर्जनाः॥ अन्याभ्यासपरा नित्यं भविष्यंति कलौ युगे॥
सर्ववेदस्तुतं पुण्यं शिवनामातिपावनं॥ स्यक्त्वान्यनाम
संसक्ता भविष्यंति कलौ युगे॥ शिवमायामोहितानां

॥११॥

अभाग्यानां दुरात्मनां॥ शिवार्चने कलौ प्रीतिर्न भविष्यति
सर्वथा॥ कलिंप्राप्य महादेवं योर्चयिष्यति सर्वदा॥ नत
स्मादधिकोप्यन्यः सत्यं सत्यं न संशयः॥ यस्यास्ति शं
करे नित्यं भक्तिरव्यभिचारिणी॥ तद्दर्शनेन पापानि
विनश्यंति बहून्यपि॥ शिवनामामृतास्वादमोदमाना
मनीषिणः॥ भूरिपुण्यप्रभावेण दृश्यंते खलु शांकराः॥
समेपि शैवद्विकारो न केतव्यः शुभेप्सुभिः॥ सत्यमेतत्
सत्यमेतदुच्चस्य भुजमुच्यते॥ मोक्षार्थी स शिवादन्यं यः पू
जयितुमिच्छति॥ स उन्मत्त इति ज्ञेयो वेदमार्गबहिष्कृतः॥
अथ परशिवलोकमाहिमा॥ शैवपुराणे॥ निष्कले स्याज्जते
योपि रुद्राविष्णुपितामहाः॥ प्रवर्तयंति संसारमहंकारा
दिसंभवाः॥ संहारसमये पि ते रुद्रविष्णुपितामहाः॥ ॥ला
तत्रैव तिष्ठंति सार्थ्यं प्रसेति॥ भो द्विज॥ दसमासस्येतपःसैलं

वैराजे [illegible] ऽप्यरजस्तमः॥ध्यतिराज्ञाविधानतःतेनतत्रतिष्ठं
तिनिस्वराः॥गायत्रीतिरिजोलक्ष्मीभारतीगिरिवासिनो॥
तिष्ठंतिमातरश्चापितत्रलोकेमहेशितुः॥परार्धकालेसं
हारेसत्यलोकादिवासिनः॥सर्वेलीनिप्रतसंगाःशिवलो
केप्रयांतिवै॥नासौनश्यतिसंहारेशिवलोकःसनातनः॥
वर्तितेतत्रभगवान्सर्वतोक्षिशिरोमुखः॥परेप्रलयकाले
चसलोकःपरमात्मनि॥वासिभिःसहितोयातिनिर्वाणं
जगदीश्वरे॥मनसानिर्मितोलोकःस्वमिच्छेपरमात्मना॥
गगनेतिष्ठतिद्रोणेनिराधारेहिरण्मयः॥प्रदीप्तार्कप्रका
शेनकांचनेनसुवर्चसा॥प्राकारेणावृतोलोकोदेवदेव
स्यधूर्जटेः॥द्वाराणितत्रचत्वारिकांचनानिवराणिच॥
मुक्ताखचितमध्यानिनानारत्नचितानिच॥तत्रातिष्ठं
तिविप्रेंद्रसत्यनपोमनोरमाः॥तत्ररत्नमयीभूमिःस्य

॥१२॥

रीमात्रसुखप्रदा॥तत्रास्तेसहितःपत्न्याषड्विंशःपुरु
षःपरः॥ओंकारवाच्यःश्चिद्रूपःपरमात्माक्षरःप्रभुः॥
यस्मिन्विवादाजायंतेवादिनोविविधात्मिकाः॥आ
त्मेसर्वांकरस्तत्रप्रकृत्यासहितःपरः॥यंपश्यंतिहृदि
ध्यानाद्योगिनोदीपसंनिभं॥स्वयमेवसतत्रास्ते
भगवान्प्रणवात्मकः॥गायित्रीभारतीलक्ष्मीरुमा
देव्यःपतिव्रताः॥तत्रैवसंतिविप्रेंद्रस्वंस्वंपतिमुपा
श्रिताः॥रुद्राणीकोटयस्तत्रससंख्याःसहस्रशः॥
परमैश्वर्यसंयुक्तैःक्रीडंतीहमातरः॥नाध्वयो
व्याध्यस्तत्रनमदोनचमत्सरः॥लोकेभगवतः
शंभोःसुखमेवोपजायते॥तत्रसाक्षात्स्वयंब्रह्मपर
मात्माक्षरात्मकः॥वर्ततेपरमानंदःप्रकृत्यासहितःपरः॥
ससांबमूर्तिमास्थायस्वयमेवनिरंजनः॥ब्रह्मोदीन्ह

जंति ब्रह्मन्परमां सनातनः ॥ आराधयंति ते रुद्रं वा ब्रा
मे नःकाय [illegible] कर्मभिः ॥ ते यांति तत्सुरं शंभोर्निवृत्ते पुनर्य
तः ॥ स लोको लभ्यते ब्रह्मन्महद्भिः सुकृतैः कृतैः ॥ यत्र यो
गेश्वरः साक्षात्स्वयमेवास्ति शंकरः ॥ ये शंचक्रगदापा
णिं ये भजंते जनार्दनं ॥ सर्वभावेन भक्तादि ते प्रयांतीह
तत्सुरं ॥ पितामहं शिवं विष्णुमेकीभावेन ये नराः ॥ विलो
कयंति ते लोकं ते प्रयांति न संशयः ॥ सर्वभूतहिता ये
च गोब्राह्मणहिताश्च ये ॥ स्वाश्रमाचारनिरतास्ते तं लो
कं प्रयांति वै ॥ उआदि सदर्शनात्तातः सोयमक्षविलोक
नं ॥ गायित्रीयोजपेन्नित्यं स तं लोकमवाप्नुयात् ॥ वारा
णस्यां प्रयागे वा येत्यजंति कलेवरं ॥ योगयुक्ताश्च ये नि
त्यं ते भजेयुश्च तत्सुरं ॥ दुर्लभा शंकरे भक्तिः शिवलोकः सु
दुर्लभ इति ॥ शिवरहस्ये ॥ नाहं वसामि कैलासे न वा मं
दरपर्वते ॥ न वा हिमाचले भद्रे काश्यामेव वसाम्यहं ॥ न स

न्यप्यत्र कैलासे विलासार्थं कदाचन ॥ विहाय काशी
मनिशं न वसामि मनोरमे ॥ ज्योतिःपुंजमयी काशी ज्ञा
नरूपा मनोरमा ॥ तया तु सदृशं वस्तु नास्ति ब्रह्मांडगोले
के ॥ शिवपुराणे पि परं शिवस्थानं ॥ शृणु विप्रेंद्र स्थानं प
शिवस्य परमात्मनः ॥ यन्न पश्यंति दुर्बुध्या ब्रह्माद्याद्वि
जसत्तमाः ॥ सांख्याश्चाप्यथवा योगाः ॥ न विदुस्तद्धिप्या
जनाः ॥ न विंदंति महास्तत्र उमालनच गणेश्वराः ॥ न
विष्णुर्वायुरिंद्रश्च न चान्ये द्विजसत्तमाः ॥ तस्यैव च प्र
सादेन यथाज्ञानं तथा शृणु ॥ शतकोटिसहस्राणां
योजनानां प्रमाणतः ॥ तस्योपपीठं देवस्य यत्र मु
ख्यः शिवोव्ययः इत्यादि ॥ शतं रुद्रसहस्राणि विष्णु
कोटिशतानि च ॥ शिवप्रसादात्क्रीडंति सर्वेपि ग

॥१५॥

तत्कल्मषाः ॥ स्कांदेपि ॥ षोडशावरणं चक्रं मध्यपीठो
परिस्थितमिति ॥ सांबपुराणे ॥ मम महिमा ॥ ब्रह्म
घ्नो वा सुरापो वा गोघ्नो वा गुरुतल्पगः ॥ शिवनामस्म
त्वापि वा मुच्यते सर्वपातकैः ॥ महापातकयुक्तो वा युक्तो
वाप्युपपातकैः ॥ ये भजंते महादेवं ते यांति परमां गतिं ॥
शैवागमेपि ॥ सर्वलोकपातिः शंभुर्मुक्तिदो नात्र संश
य इति ॥ भुक्तिमुक्तिप्रदः शिव इति श्रुतेश्च ॥ शास्त्रदाति
लके शैवयोगमाह ॥ शिवात्मनोरभेदेन प्रतीतिं परे वि पश्य
दुरिति ॥ अपरे शैवाः ॥ तथा चानंदभैरवे ॥ प्राणादि
तथा भावनं त्यक्त्वा हृदयसंपदः ॥ स्वात्मभावेनाचिंतेन वि
शेद्धि शिवपदं शनैरिति ॥ कौर्मे ईश्वरगीतायां ॥ अथ
वा भक्तियोगेन वैराग्येण परेण च ॥ चेतसा बोधयु

॥१५॥

क्तेन पूजयेन्मां सदा शुचिः ॥ सर्वकर्माण्यपि सदा
कुर्वाणो मत्परायणः ॥ मत्प्रसादादवाप्नोति शाश्व
तं पदमव्ययमिति ॥ अद्वेष्टा सर्वभूतानां मैत्रः करु
ण एव च ॥ निर्ममो निरहंकारो यो मद्भक्तः स मे प्रि
यः ॥ यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति ॥ शुभा
शुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥ समः शत्रौ
च मित्रे च तथा मानापमानयोः ॥ शीतोष्णसुखदुःखे
षु समः संगविवर्जितः ॥ चेतसा सर्वकर्माणि मयि सं
न्यस्य मत्परः ॥ निराशीर्निर्ममो भूत्वा मामेकं शरणं
व्रजेत् ॥ रत्नाद्यैः कारयित्वैवमर्चयेल्लिंगमेश्वर ॥ स
र्वलिंगमयं ह्येतत्सर्वं लिंगे प्रतिष्ठितं ॥ लिंगात्परतरं
नास्ति लिंगं मोक्षप्रदं मतं ॥ तस्माल्लिंगेर्चयेदीशं य
त्र क्वचन शाश्वतं ॥ अन्योक्तिया वक्तामप्युमोम्नि स्तूर्ये

१४

॥१५॥

मनीषिणां॥पाषाणेस्तानिनां नित्यं हृदि लिंगं तु यो
गिनो॥यावज्जीवं जपेत्सम्यक्प्रणवं ब्रह्मणो वपुः॥अ कृ
हं हि प्रणवस्यान्ते मकाराख्यः स्थितोव्ययः॥तस्मा
दरिष्ठः सर्वात्मा परं ब्रह्माणमेव चेति॥वार्तिकसं
मतिमाह॥अकारं पुरुषं विश्वमुकारे प्रविलाप
येत्॥उकारं तैजसं सूक्ष्मं मकारे प्रविलापयेत्॥
मकारं कारणं प्राज्ञं चिदात्मनि विलापयेदिति॥
स्कांदे॥अकारो भगवान् विष्णुरुकारस्तु पितामहः॥
मकारो भगवान् रुद्रः परमात्मा सनातन इति॥अ
ता यपुराणोत्तरे असंख्यानि शिवस्थानि तेषां म
ध्ये शिवस्याष्टौ स्थानानि मुख्यानीति॥तदुक्ता
नि शिवपुराणे॥[illegible]

॥१५॥

[illegible] इह लोके तु या
न्यष्टौ स्थानानि शृणु तानि मे॥रुद्रं रुद्रपदात्कोटि
रविमुक्तं महालयं॥गोकर्णं भद्रकर्णं च स्वर्णाक्षं स्था
नमष्टमं॥स्थानेष्वेतेषु सततं सान्निध्यं कुरुते भवः॥
अनुग्रहं च कुरुते भक्तानां भक्तवत्सल॥अथ अष्टौ हरि
श्चंद्रादि अष्टौ गुह्यस्थानानि तत्रैव॥महेश्वर उवाच॥स्व
यतां परमं गुह्यं येषु नित्यं वसाम्यहं॥हरिश्चंद्रपुं गुह्यं रं गु
श्रीपर्वतं तथा॥जलेश्वरं परं गुह्यं गुह्यमाम्रातकेश्वरं॥म
हाकालं परं गुह्यं गुह्यं मध्यमकेश्वरं॥देवदारुवनं गुह्यं म
हाभैरवमेव च॥गुह्यान्येतानि स्थानानि यः कश्चिदपि
गच्छति॥भक्त्या परमया युक्तो भक्तो वै श्रद्धयान्वितः॥एता
नि दृष्ट्वा यो भक्त्या तस्य तुष्याम्यहं सदा॥गुह्यस्थानगतो
यो मां भक्त्या वै श्रद्धयान्वितः॥बलिपुष्पोपहारैश्च गंधपुष्पै

विलेपनैः॥ प्रणिपातेन चान्येन यो मां समधिगच्छ
ति॥ अकामो वा सकामो वा गृहस्थेष्वेतेषु यो नरः॥ ब्रा
ह्मणः क्षत्रियो वैश्यो शूद्रोप्यंत्यज एव च॥ म्लेच्छो वा
क्रूरकर्माणः स्त्रियो वापि नपुंसकः॥ गाणापत्यं ध्रु
वं स्थानं शिवलोके महीयते॥ अक्षय्यस्य लोका
श्चैव तथाप्यन्ये मयंतिये॥ पितॄणां चैव मक्षयं स्थाने
ष्वेतेषु यो नरः॥ श्राद्धं दद्यान्महाभागो दद्याद्वापि ति
लोदकं॥ दर्भास्तरणसंकीर्णं दद्याद्वापि तिलोदकं॥
तेवाहि पितरः सर्वे स्वर्गलोकं व्रजंति ते इति॥ हाला
स्य माहात्म्ये॥ पुण्यक्षेत्रेषु सर्वेषु वरमानंदकान
नं॥ पुण्यतीर्थेषु सर्वेषु विशिष्टो मणिकर्णिका॥
सर्वेषु शिवलिंगेषु श्रीविश्वेशो महानिति ति॥ वि

श्वाधिको रुद्र इति॥ विश्वाधिकत्वेनानिखिलवि
कारोत्तीर्णस्य परमेश्वरस्य विकाररूपप्रपं चानुप्रवे
शो न घटते॥ ततः परमेश्वरमंतरेण जीवादिष्वेकतमः
पक्षे स्यादंतर्यामीति पूर्वप्राप्ते ब्रूमः॥ एषि म्याघंतर्यामित
वाश्रूयमाणपरमेश्वर एव सर्वांतरत्वादितद्धर्मव्यप
देशात्॥ शिवाय वीरेश्वरासि॥ सोंतरादंतरं प्राविशत् दि
ति परमेश्वरस्यैव सर्वात्मतयानुप्रवेशदर्शनात्॥ सर्वा
त्मांतर्यामि अमृत इति शिवएँ अनादिमुक्तोऽमृत इत्युच्य व
ते॥ अथ सर्वेत्रापि महाभारते॥ रूपस्य शिवरूपं जो निष्ठ
वै तत्प्रसादलब्धसकलप्रभावश्च वर्ण्यते॥ [illegible] तत्रै
तो य स्तौ पुरुषके अश्वत्थामानं प्रति शिववचनं॥ सत्यशौचा
र्जवत्यागैस्तपसा नियमेन च॥ क्षांत्या धृत्या च भक्त्या च क
र्मणा मनसा गिरा॥ यथावदहमाराध्यः कृष्णेनाक्लिष्टकर्मणा

॥१७॥

आ तस्मादन्यतमः दैदन्यो मम न विद्यत इति। द्रोणपर्वणि॥
द्रोणवधानंतरं अश्वत्थामानं प्रति श्रीवेदव्यासवचनं॥
देवदेवं यचिंत्यात्मा अभयो विष्णुरव्ययः॥ सर्वरूपं भवं ज्ञा
त्वा लिंगेर्चयति तं प्रभुं॥ सर्वरूपं भवं ज्ञात्वा लिंगे योर्चयति प्रभुः
प्रभु॥ तस्मिन्नभ्यधिकां प्रीतिं करोति वृषभध्वज इति॥ आ
रण्यपर्वणि तीर्थयात्राविधौ॥ ततो गच्छेत्सुपर्णाख्यं त्रिषु लो
केषु विश्रुतं॥ यत्र विष्णुः प्रसादार्थं रुद्रमाराधयत्पुरा॥ वरांश्च
सुबहून् लेभे दैवतैरपि दुर्लभान्॥ उक्तश्च त्रिपुरघ्नेन परितुष्टे
न भारत॥ अपि चास्मत्प्रियतमो लोके कृष्णो भविष्यति॥ त्वन्मु
खं च जगत्सर्वं भविष्यति न संशयः॥ अन्यैः प्राचीनचरितेभ्यो
ऽन्यैः॥ अत एव जगत्सर्वं त्वन्मुखं त्वत्प्रधानं भविष्यतीत्यर्थः॥
आनुशासनिके च॥ अस्य ब्रह्मा च विष्णुश्च त्वं च शक्र सहाम
रैः॥ अर्चयिष्ये सदा लिंगं तस्मात्तज्यतरोधिक इति॥ उपम
न्युवचने ब्रह्मविष्ण्वादीनां नित्यमेव शिवाराधकत्वं स्पष्टी

॥१७॥

कृतं॥ श्रीपरशिवस्य त्रिमूर्तिस्रष्टृत्वमानुशासनिके प्र
तिपादितं॥ स एव भगवानीशः सर्वतत्त्वावबोधकः॥ सर्वत वै
त्वविधानज्ञः प्रधानपुरुषेश्वरः॥ योसृजद्दक्षिणादंगाद्ब्र
ह्माणं लोकसंभवं॥ वामपार्श्वात्तथा विष्णुं लोकरक्षार्थमीश्वरं॥ क
युगांते चैव संप्राप्ते रुद्रं प्रभुरथासृजदिति॥ तेषामापत्ति
वारणादिना शिवस्य रक्षकत्वं शांतिपर्वणि प्रतिपादि
तं॥ यं विष्णुरिंद्र [illegible] प्रभुस्तथा ब्रह्मा लोकपितामहः॥ स्तुवे
ति विविधैस्तोत्रैर्देवदेवं महेश्वरं॥ तमर्चयंति ये शश्वद्दुर्गाण्य
त तितरंति ते॥ अत्र शिवाराधनस्य दुर्गतितरणोपायत्वोक्त्या वि
ष्ण्वादीनां स्तोत्रमपि तदर्थमित्यवसायात्॥ स्तुतिभिः प्रीतस्य
शिवस्य तत्संरक्षकत्वं विवक्षितमित्यवसेयं॥ शिवस्य तत्संह
र्तृत्वमपि शांतिपर्वणि प्रतिपादितं॥ ईश्वरश्चेतनः कर्ता पु
रुषः कारणं शिवः॥ विष्णुर्ब्रह्मा शशी सूर्यः शक्रो देवाश्च
सान्वयाः॥ सृज्यते ग्रसते चैव तमोभूतमिदं यदा॥ अप्रज्ञा
तं जगत्सर्वं तदा ह्येको महेश्वरः॥ अत्र संहाररुद्रस्याविभा

१८

सोऽविवक्षितः॥ तदास्येको महेश्वर इति वाक्यशेषात्तास्र
लस्लौके सृष्टिं संहृतिं चेति चकारेण रक्षा सूचिता॥ एवं च
ब्रह्मविष्णुरुद्राणामपि सृष्टिके मुक्तिके न्यायेन सर्वस्य ज
ग[illegible]तः कर्तेति सिद्धः॥ यतो वा इमानि भूतानीत्यादि ल
क्षणलक्षितब्रह्म शिव एवेत्यर्थात्सिध्यतीति तद्योतनार्थं दु
ते रुवानित्यर्थः॥ द्योतयन्तीति हेतौ शतृप्रत्ययः॥ श्वेताश्व
तरोपनिषदि॥ यदातमस्तं न दिवा न रात्रिर्न सन्न चासच्छि
व एव केवलं इति शिवशब्दवाच्यं वस्तु कारणत्वेन सकलपूर्व
वि भाविब्रह्मेति ज्ञायते॥ अपि च॥ मायां च प्रकृतिं विद्यान्मा
यिनं तु महेश्वरं॥ अस्यावयव[illegible]भूतैस्तु व्याप्तं सर्वमिदं ज
गदिति॥ [illegible] माया
मेव प्रकृतिं जगदुपादानकारणं विद्यात् ज्ञानीयात्॥ [illegible]
मायिनं तु मायोपाधिकमंतर्यामिणमेव महेश्वरं [illegible]
[illegible] मायाधिष्ठातारं निमित्तकारणं जानीयात्॥
महेश्वर अस्य मायिनोऽवयवभूतैः स्वांशरूपैश्चरा[illegible]चरात्मकैः

॥१८॥

जीवैः कृत्स्नमिदं जगद्व्याप्तमित्यस्याः श्रुतेरर्थः॥ य
त्सर्वसत्त्वादिविशिष्टं शिवतत्त्वं तदेव जगत्कारणं ब्र
ह्मेत्युच्यते॥ सर्वज्ञता तृप्तिरनादिबोधः स्वतंत्रता
नित्यमलुप्तशक्तिः॥ अनन्तशक्तिश्च विभोर्विधिज्ञाः
षडाहुरंगानि महेश्वरस्य॥ इति श्रीमद्रुद्रोपनामक
जयरामभट्टसुतवाराणसीगर्भसंभवकाशीनाथ
विरचिते शिवभक्तिरसायने द्वितीयोल्लासः॥ श्रीद
क्षिणामूर्तिगुरुभ्यो नमः॥ अथ शैवाह्निकप्रकारः॥
प्रातरुत्थाय स्वशिरसि वंदे गुरुपदद्वंद्वं अवाङ्मनसगो
चरं॥ रक्तशुक्लप्रभामिश्रमतर्क्यं त्रैपुरं महइति ध्यात्वा
ॐ हंसः सोहं श्रीशिवानंदनाथगुरुभ्यो नमः॥ नमो
स्तु गुरवे तस्मै इष्टदेवस्वरूपिणे॥ यस्य वागमृतं हंति
विषं संसारसंज्ञकमिति नत्वा॥ अहं सांबो न चान्यो

॥१८॥

स्मिन् ब्रह्मैवाहं न शोकभाक् ॥ सच्चिदानंदरूपोहं नित्यमु
क्तः स्वभाववानिति ध्यात्वा ॥ त्रैलोक्यचैतन्यमया
मं२ दिदेव श्रीसांब शंभो भवदाज्ञयैव ॥ प्रातः समुत्थाय
तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये ॥ इति प्रार्थ्य ॥ तिथ
दुर्वास कौशिक विरंचि मकुंडपुत्र देवेंद्र बाण हरि
नंदिधीदेचिरामान् ॥ कण्वादि भार्गव दशानन गौ
तमाद्याः पुण्यानि मान्यरमपाशुपतान्नमामि ॥
भासित शैवपुराणे ॥ भस्मभालाय रुद्राक्षाभरणाय ते ॥ चं
द्रचूडकिरीटाय नमः शैवाय विष्णवे ॥ एवं विष्णुगु
रुत्वेन व्याला पृथ्वीं समर्चयेत् ॥ ॐ पृथिव्यै नमो भूम्यै ति
त्रेण ॥ समुद्रमेखले देवि पर्वतस्तनमंडले ॥ विष्णु
पत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ इति प्रार्थ्य

॥१९॥

ततो मूत्रपुरीषादि कृत्वाचम्य विहितदिने क्लीं काम
देवाय सर्वजनप्रियाय नम इति मंत्रेण दंतान् संशो
ध्य पापाद्द्वादशगंडूषैर्मुखशोधनं च कृत्वाचम्य वैदि
कस्नानानंतरं आचम्य प्राणानायम्य देशकालौ स्मृ
त्वा मम उपात्त दुरितक्षयद्वारा श्रीपरशिवप्रीत्यर्थं अ
मुकतीर्थे प्रातःस्नानमहं करिष्ये इति संकल्प्य जैस्यः लद
॥ नैःष्यादि स्मरणपूर्वकं मूलमंत्रेण श्रीमत्परशिवं
संचिंत्य जले बिंदुयुक्तत्रिकोणमंडलं कृत्वा गंगे च य
मुने चैव गोदावरि सरस्वति ॥ नर्मदे सिंधु कावेरि ज
लेऽस्मिन् सन्निधिं कुरु ॥ ओं इत्यंकुशमुद्रया सूर्यमंड
लात्तीर्थमावाह्य वैमित्स्यमूलबीजेनैकादशवारमभि
मंत्र्य फडित्यस्त्रमंत्रेण संरक्ष्य तज्जले परशिवमूर्तिं

१८

ध्यात्वात्र्यंबकमंत्रेणानेमूलमंत्रमुच्चार्यकुंभमुद्धृत्या
त्वाशिरस्यभिषिंचतीर्थजलैर्निमज्जत्रिवारंमंत्रंज
पन्यघमर्षणंकृत्वाचम्यजलतर्पणादिकंकृत्वाशु
चिवस्त्रंधृत्वाचम्यमाहृतिभिर्भुवंप्रोक्ष्यकुशाया
सनंस्थाप्यप्राङ्मुखोदङ्मुखउपविश्यमलैनभस्म
गृहीत्वासद्योजातादिपंचब्रह्ममंत्रैरभिमंत्र्यसिते
नभस्मनाॐब्रह्मणेनमःललाटे॥हव्यवाहनायन
मःहृदये॥स्कंदायनमःनाभौ॥विश्वेश्वनमःकंठे॥
रुद्रायनमःदक्षिणबाहुमूले॥आदित्यायनमःमध्ये॥
वामदेवायनमःवामबाहुमूले॥प्रभंजनायनमःम
ध्ये॥वसुभ्योनमःमणिबंधयोः॥हरायनमःपृष्ठे॥
शंभवेनमःककुदि॥परमात्मनेनमःशिरसि॥इति

द्वादशत्रिपुण्ड्रान्कृत्वाहस्तौप्रक्षाल्यजलंबिभृत्॥
बृहज्जाबालोपनिषदि॥मध्याह्नस्नाक्रमलेपमुक्तं
तावंतदनुवर्जयेदिति॥संध्यात्रयेनिशीथेचत
थापूर्वावसानयोः॥सुप्त्वाभुक्त्वापयःपीत्वाकृत्वा
चावश्यकादिकं॥स्त्रियंनपुंसकंगृध्रंबिडालंबि
लमूषकं॥स्पृष्ट्वातथाविधानन्यान्भस्मस्नानं
समाचरेदिति॥बृहज्जाबाले॥शिखायामेकंरुद्रा
क्षंत्रिंशतंशिरसावहेत्॥षट्त्रिंशतंगलेदद्याद्बा
ह्वोःषोडशषोडश॥द्वादशंमणिबंधेपिस्कंधेपंच
दशंवहेत्॥अष्टोत्तरशतैर्मालामुपवीतंप्रकल्प
येत्॥सुप्तेपीतेसदाकालंरुद्राक्षंधारयेत्सुधि
रिति॥ब्रह्मचारीगृहस्थानांयनस्थानांतथैवच॥

रुद्राक्षस्य धारणे मंत्राः प्रोक्ता वै विस्वयोनिना ॥ प्रणवे
नैव संधार्य यतिभिः सर्वसिध्यये ॥ ततः स्वशाखो
क्तां संध्यां कृत्वा मंत्रसंध्यां कुर्यात् ॥ यथा ॥ स्वपुरतः
जले प्राग्वत् तीर्थान्यावाह्य भूमिष्ठपादोऽतं जानुहस्तः
वो प्राङ्मुखोदङ्मुखौपविश्य संहतांगुलिना स्वहस्ते जलं गृ
हीत्वा मुक्तांगुष्ठकनिष्ठिकेन वामेनान्वारब्धेन पाणि
ना ब्रह्मतीर्थेन ॐ लिंगोद्भवाय स्वाहा ॥ निर्विकाराय
स्वाहा ॥ उमापतये स्वाहेति त्रिभिर्नामभिस्त्रिः पिबे
त् ॥ अर्धनारीशाय नमः ॥ सोमास्कंदाय नम इति
द्वाभ्यां करौ प्रक्षाल्य ॥ विष्णुचक्रप्रदाय नमः ॥ त्रिमू
र्तये नम इति द्वाभ्यामंगुष्ठमूलेनोष्ठौ संमृज्य ॥ हरिहरा
त्मने नमः ॥ दक्षिणामूर्तये नमः इति द्वाभ्यां तथैव मुख
मुन्मार्ज्य ॥ भिक्षाटिनेन नम इति वामकरं प्रोक्ष्य ॥ परव्योमा

॥२१॥

ॐ तत्पुरुषाय नमः

स्थिताय नम इति पादौ संप्रोक्ष्य ॥ कंकालिकाय नमः
इति मूर्धानं संप्रोक्ष्य ॥ कामसंहर्त्रे नम इति संहतम
ध्यमांगुलित्रयेणास्यं संस्पृश्य ॥ कालसंहर्त्रे नमः
इति द्वाभ्यामंगुष्ठानामिकाभ्यां चक्षुषी संस्पृश्य ॥
त्रिपुरघ्नाय नमः शरभाकाराय नमः इति द्वाभ्यामं
गुष्ठतर्जनीभ्यां नासापुटे संस्पृश्य ॥ नीलकंठाय
नमः ॥ चतुरंगद्विशीर्षाय नमः ॥ इति द्वाभ्यां तथै
व श्रोत्रे संस्पृश्य ॥ अजैकपदे नमः ॥ इति कनिष्ठांगु
ष्ठाभ्यां नाभिं संस्पृश्य ॥ भैरवाय नम इति पाणित
लेन हृदयं संस्पृश्य ॥ वृषभवाहनाय नम इति शिरः
संस्पृश्य ॥ चंद्रशेखराय नम इति हस्तौ प्रक्षाल्य ॥ परा
नंदभराय नम इति शिवं ध्यात्वा ॥ ॐ गंगाधराय नमः
इति श्रोत्रं स्पृशेदित्याचम्य ॥ शैवपुराणे ॥ पुराणाच

मनेनैव साक्षात्परशिवो भवेदित्याचमनविधिः॥ त
तो मूलमंत्रेण प्राणानायम्य देशकालौ संकीर्त्य श्रीप
रशिवप्रीत्यर्थं प्रातःसंध्यां करिष्ये॥ मूलमंत्रस्य ऋष्या
दिकरषडंगं कृत्वा फट् इति तज्जलं संरक्ष्य तज्जलं दक्षिण
हस्तेन वामहस्ते विनिक्षिप्य तदंगुलिसंधिद्वारा निःसृते
नांबुना दक्षिणहस्तेन मूर्ध्नि सप्तधाऽभ्युक्ष्य तज्जलं दक्षि
णहस्ते [illegible] गृहीत्वा दक्षनासापुटसमी.
पमानीय तेजोमयं स्वदेहं प्रविष्टं ध्यात्वा तेन जलेन सकलां
तःकलुषं प्रक्षाल्य कृष्णवर्णपापरूपं दक्षिणनासारं पु ५
ध्रेण निर्गतं विभाव्य दक्षकरेणादाय स्ववामभागे व
ज्रशिलायां फट् इति मंत्रेण ताडयेदित्यघमर्षणविधिः॥
ततो हस्तौ प्रक्षाल्य सूर्यमंडले परशिवं ध्यात्वोत्थाय ॐ
तत्पुरुषाय विद्महे महादेवाय धीमहि॥ तन्नो रुद्रः प्रचो

दयात् श्रीपरमशिव एष तेऽर्घ्यं नम इति त्रिरर्घ्यं द
त्वा मूलमंत्रेण प्राणायामत्रयं कृत्वा सूर्यमंडले॥ ध्या
येत् सदाशिवं शांतं पार्वतीवल्लभं शिवं॥ आदित्यमं
डलांतस्थं विश्वनाथं सनातनमिति ध्यात्वा शिवगा
यत्रीं यथाशक्ति जपित्वा समर्प्य जले परशिवं विभाव्य
मूलमंत्रमुच्चार्य श्रीसांबशिवं तर्पयामि नम इति पंच
विंशतिवारं देवस्य मुखकमले परं मत्वा बुध्या संतर्प्य दे
वं स्वहृदये सूर्यं तीर्थे च विसृज्य श्रीगुरुं प्रणमेदिति त्रि
काले मंत्रसंध्याविधिः॥ ततो यागमंदिरं गत्वा प्रक्षा
लितपाणिपादनेत्रः आचम्य पूजामंडपद्वारं गत्वा फ
डिति मंत्रेण प्रोक्ष्य॥ द्वारस्योर्ध्वशाखायां ॐ॥ विघ्नायन
मः॥ दक्षिणे महालक्ष्म्यै॥ वामे सरस्वत्यै॥ पुनर्मध्ये द्वा
रश्रियै॥ द्वारस्य वामदक्षिणशाखयोः॥ गणपतये नमः॥

मा)

क्षेत्रपालाय नमः ॥ शंखनिधिवसुधाराभ्यां नमः ॥
पद्मनिधिवसुमतीभ्यां नमः ॥ मायाशक्त्यै नमः ॥
चिच्छक्त्यै ॥ गंगायै ॥ यमुनायै नमः ॥ धात्रे नमः ॥
विधात्रे नमः ॥ इति द्वंद्वक्रमेण संपूज्य ॥ देहल्यां दे
हल्यै नमः ॥ तदधो वामदक्षिणयोः ॥ नंदिने नमः ॥
महाकालाय नमः ॥ इति पूर्वद्वारपूजा ॥ दक्षिणग
त्वा पूर्ववत्संपूज्य द्वारपार्श्वयोः ॐ गणेशाय ॥ वृष
भाय ॥ पश्चिमद्वारे पूर्ववत्पूज्य पार्श्वयोः ॥ भृंगिरी
टये ॥ स्कंदाय ॥ उत्तरद्वारे पूर्ववत्संपूज्य द्वारयोः पा
र्वत्यै ॥ चंडेश्वराय ॥ इति संपूज्य पुनः पूर्वद्वारं गत्वा
ऽस्त्रमंत्रेण तालत्रयपूर्वकं द्वारमुद्घाट्य ॐ अपस
र्पंतु ये भूता ये भूता भूमिसंस्थिताः ॥ ये भूता वि

॥२२

घ्नकर्तारः ते नश्यंतु शिवाज्ञया ॥ इत्यंते अस्त्रमंत्रेज
प्तं जलं मंडपांते प्रक्षिप्य तस्मान्निर्गच्छंतां विघ्नसंघा
नां स्वामांगसंकोचेन मार्गं दत्वाऽस्त्रमंत्रं स्मरन्वाम
पार्ष्णिघातत्रयेण भौमानूर्ध्वतालत्रयेणांतरिक्ष
गान्दिव्यदृष्ट्यवलोकनेन दिव्यान्विघ्नानुत्सार्य दक्षि
णपादपुरःसरं देहलीमुल्लंघ्य वाससा द्वारमाश्राय मं
डपाभ्यंतरं मूलमंत्राभिमंत्रितजलेन प्रोक्ष्य ॥ तत्र स्था
सने ॐ भूर्भुवः स्वरिति मंत्रेण प्रोक्ष्य तत्र चैलाजिनकुशो
त्तरं स्वासनमास्तीर्य मूलेनाभ्युक्ष्य ॥ मेरुपृष्ठऋषिः ॥ सु
तलं छंदः ॥ कूर्मो देवता ॥ आसनोपवेशने विनियोगः ॥
पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धा
रय मां देवि पवित्रं कुरु चासनं ॥ इत्यासनमभिमंत्र्य ह्रीं आ
धारशक्तिकमलासनाय नमः इत्यासनं संपूज्य तत्रोद
ङ्मुखोपविश्यासनस्य स्वदक्षिणाग्रकोणादिषु तु को

22

णेषु प्राग्दक्षिण्येन मं गं गणपतये नमः ॥ दुं दुर्गायै नमः ॥
सं सरस्वत्यै नमः ॥ क्षं क्षेत्रपालाय नमः ॥ अथ गुरून्न
मस्कारस्तु ॥ श्रीगुरुभ्यो नमः ॥ परमगुरुभ्यो नमः ॥ २२
परात्परगुरुभ्यो · ॥ वामदेवाय · भारत्यै · ॥ ब्रह्मणे नमः ॥
विष्णवे नमः · रुद्राय नमः · श्रीदक्षिणामूर्तिगुरुभ्यो नमः
परशक्त्यै नमः ॥ श्रीमत्परशिवाय नमः ॥ इति नत्वा ततो
भूतशुद्धिप्राणप्रतिष्ठामातृकान्यासांतं कृत्वा ॥ अशक्त
श्चेत् ब्रह्मैवेदं सर्वं ॥ आत्मैवेदं सर्वं इति भूतशुद्धिः ॥ आं
सोहं इति प्राणप्रतिष्ठा ॥ ॐ अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं
ओं औं अं अः कं खं गं घं ङं · चं छं जं झं ञं टं ठं डं ढं णं तं थं
दं धं नं पं फं बं भं मं यं रं लं वं शं सं हं ळं क्षं ॥ इति मातृकामंत्रेण
त्रिवारं व्यापकं कृत्वा पीठन्यासं कुर्यात् ॥ तत्र हृदये ॥ ॐ आ
धारशक्त्यै नमः ॥ तत्रैव कूर्माय नमः ॥ शेषाय क्ष्मायै · सु
धार्णवाय · रत्नद्वीपाय · स्वर्णपर्वताय · नंदनोद्यानाय · क
ल्पवृक्षेभ्यो नमः ॥ विचित्ररत्नभूम्यै · स्वर्णप्राकाराय · रत्न

मंडपाय · स्वर्णवेदिकायै · रत्नसिंहासनाय · सिंहास
दि नस्याग्नेयीकोणे ॐ धर्माय · ज्ञानाय · वैराग्याय · ऐश्व
र्याय ॥ सिंहासनस्य पूर्वादिषु · अधर्माय · अज्ञाना दि३
य · अवैराग्याय · अनैश्वर्याय · मध्ये अनंतासनाय · प
द्माय · अं अर्कमंडलाय · उं सोममंडलाय ॥ सं सत्वाय · रं
रजसे · पूर्वादिदिक्षु अं आत्मने · उं अंतरात्मने · मं परमात्म प६
ने · ॐ ज्ञानात्मने · ततः पद्मस्य पूर्वादिदले ॐ वामायै ·
ज्येष्ठायै · रौद्र्यै · काल्यै · कलविकर्ण्यै बलविकर्ण्यै · बल
प्रमथिन्यै · सर्वभूतदमिन्यै · मध्ये मनोन्मन्यै नमः ॥ ॐ न
मो भगवते सकलगुणात्मशक्तियुक्तायानंतात्मने यो
गपीठाय नमः इति मंत्रेण पीठं संपूज्य इति योगपीठ
न्यासः ॥ अथ मूलमंत्रन्यासः ॥ तत्रादौ मूलमंत्रेण प्रा
णायामत्रयं कृत्वा ॐ अस्य श्रीशिवपंचाक्षरमहामं

।।२५।।

त्रराजस्य वामदेवऋषये नमः शिरसि ।। पंक्तिश्छंदसे
नमः मुखे ।। श्रीसांबशिवः परमात्मा देवतायै नमः
हृदये ।। ॐ बीजाय नमः नाभौ ।। उमेति शक्त्यै नमः
पादयोः ।। मम धर्मार्थकाममोक्षार्थे जपे विनियोगः ।
नं तर्जनीभ्यां नमः ।। मं मध्यमाभ्यां नमः ।। शिं क
निष्ठिकाभ्यां । वां अनामिकाभ्यां · यं अंगुष्ठाभ्यां ।
नमः शिवाय करतलकरपृष्ठाभ्यां । नं हृदयाय · मं
शिरसे स्वाहा ।। शिं शिखायै वषट् । वां कवचाय हुं ।
यं नेत्रत्रयाय वषट् ।। नमः शिवाय अस्त्राय फट् ।।
अथ दशविधन्यासान् कुर्यात् ।। ॐ नमः हृदये । नं · मु
खे मं · दांसे ।। शिं · वामांसे । वां · दक्षोरौ । यं · वामोरौ इ
ति प्रथमन्यासः ।। ॐ नमः कंठे । नं · नाभौ । मं · दक्ष

।।२५।।

पार्श्वे ।। शिं · वामपार्श्वे ।। वां · पृष्ठे ।। यं · हृदये ।। इति द्विती
यन्यासः ।। २ ।। ॐ नमः मूर्ध्नि · नं · आस्ये ।। मं · दक्षिणने
त्रे ।। शिं · वामनेत्रे ।। वां · दक्षनासापुटे । यं · वामे ।। इति तृती
यः ।। ३ ।। एवं दोःपत्संध्यग्रेषु च ।। अत्रैवैकस्मिन्करे एके
कस्मिन्पादे च संधिपंचकमग्रं च न्यासस्थानपंचकं ।।
एवं करद्वये पादद्वये च ।। ॐ नमः दक्षहस्तमूले । नं · म
ध्ये । मं · दक्षमणिबंधे । शिं · दक्षांगुलिमूलेषु । वां · दक्षां
गुलिमध्येषु । यं · दक्षांगुल्यग्रेषु ।। ॐ दक्षपादमूले ।।
नं · दक्षपादजानुनी । मं · दक्षपादगुल्फे । शिं · दक्षपादांगु
लिमूलेषु ।। वां · दक्षपादांगुलिमध्येषु । यं · दक्षपादांगुल्य
ग्रेषु इति ।। ॐ · शिरसि । नं · वदने । मं · हृदि । शिं · कुक्षौ ।। वां ·
दक्षोर्वादि दक्षपादे । यं · वामोर्वादि वामपादे ।। इत्यष्ट
मन्यासप्रयोगः ।। चतुर्थः ४ ।। एवं यामो पंचमः । ५ ।।

ति२

२५

॥२८॥

षष्ठः॥६॥ एवं वामेंसस्तमन्यासः॥७॥ सशिरोवक्त्रहृ
दयजठरोरुपदेष्वपीत्यष्टमः॥ हृदस्थाननपरस्थेणाभि
त्याख्यवरदेष्वपि॥ अत्र परस्थेणाभीत्याख्यावरदेतित
तदायुपस्थानयुक्त इति नवमः॥ प्रयोगस्तु ॐ॰ हृद॥
नेत्रे क्रांबुजे॥ मं॰ टकायुधे॥ रिं॰ मृगायुधे॥ वां॰ अभये॥ यं॰
वरे॥९॥ मुखांसहृदयेषुत्रीप्रशान्यादोरुकुक्षिषु॥१०॥
एवं दशविधन्यासान्कृत्वा॥ ॐ नमोस्तु स्थाणुरूपाय
ज्योतिर्लिंगामृतात्मने॥ चतुर्मूर्तिवपुस्थाय भासितां
गाय शंभवे॥ इत्यनेन मंत्रेण परशिवानुसंधानार्थं त्रि
वारं पुष्पांजलिं दत्वा स्वहृदये तन्मूर्तिं ध्यायेत्॥ उमार
हितकमंगंस्तुल्कं सोमार्धशेखरं॥ व्याघ्रचर्मांबरधरं
नीलग्रीवं त्रिलोचनं॥ वरदायहस्तं च विचित्रमुकुटोज्ज्व म२
लं॥ सर्वलक्षणसंयुक्तं सर्वाभरणभूषितं॥ स्वस्वरूपा
नुसंधानप्रमोदातोऽवप्रियं॥ त्रिमूर्तिभिः सदा ध्ये
प्रयोगोऽ ॐ॰ वक्त्रे॥ नं॰ अंसयोः॥ मं॰ हृदये॥ शिं॰ पादयोः॥ वां॰ ऊर्वोः॥ यं॰ कुक्षौ॥२८॥
इति दशमः॥१०

ये॥ कैवल्योपनिषत्स्तुतं॥ स्मरणादेव मजातां संसा
रभयनाशनं॥ लिंगमूर्तिगतं ह्यासंलिंगमूर्त्युपल
क्षितं॥ विष्ण्वादियोगनामानं रुद्राणीदिसंश्रितं॥
पा४ अगन्निमतौद्धनमज्ञानाश्रयगोचरं॥ सर्वोपाम
षदामर्थंशब्दलालंकृतंत्वतः॥ स्वभक्तानां तत्त्वबुद्धि
प्रदं रुद्रस्वरूपतः॥ पितामहस्य रूपेण सृष्ट्यादिगु
णदायिनं॥ अतितीव्रमुमुक्षुं च दायिनं॥ विष्णुरूपतः
विश्वेश्वरस्वरूपेण देशिकोत्तमलाभदं॥ उसादकेम
हावृतेः परशक्तिस्वरूपतः॥ मुखदो मोक्षदातारं पष्ठः
सर्वज्ञसिद्धिदं॥ पक्ष सोहं लोकदृष्ट्या शास्त्रदृष्ट्याय
दशकं॥ यदा सैव ज्ञानदृष्ट्या तं भजे सांबमीश्वरं॥
एवं ध्यात्वा महाराजन्यासान्स्वोचितमंत्रतः॥ उप

२६

चारान् प्रकुर्वीत महादेवस्य तुष्टये॥ उपचारान्मा
नसोपचारान्॥ अथ ब्रास्माराधेन प्रयोगः॥ तत्रा
दौ पूजायंत्रोद्धारः॥ षट्कोणांतर्मूलयुक्तं प्रासाद
बीजमेव च॥ सांधिष्वंगानि तद्बाह्ये पत्रं पंचदलं तंबि
ह॥ ईशानाद्याः पंचमूर्तीर्ङेहृदंता लिखेत्ततः॥ अष्टप
त्रं मातृकाष्टवर्गयुक्तं लिखेद्बहिः॥ संवेष्ट्यानुष्टुभा यं
त्रं पूजाहोमादिसाधितमिति॥ अथ पात्रस्थापनं॥
पूजायंत्रं पीठे संस्थाप्य पुष्पांजलिं दत्वा॥ आगमा
र्थं तु देवानां गमनार्थं तु रक्षसां॥ कुरु घंटे रवं नादं दे
वतास्थानसंनिधाविति घंटां वादयित्वा॥ स्वस्य
अग्रे चंदनेन षट्कोणमंडलं कृत्वा तदुपरि त्रिपा
दाधारं संस्थाप्य ॐ मं धर्मप्रद दशकलात्मने वह्नि
मंडलाय श्रीपरशिवार्घ्याधाराय नमः॥ इत्यार्घ्या

रं संपूज्य॥ आधारोपरि महार्घ्यं संस्थाप्य ॐ अं अर्थ
प्रद द्वादशकलात्मने सूर्यमंडलाय श्रीपरशिवार्घ्य
पात्राय नमः इति पात्रं संपूज्य मूलमंत्रेण जलमा
पूर्य ॐ उं कामप्रद षोडशकलात्मने सोममंडलाय
श्रीपरशिवार्घ्यामृताय नमः इति जलं संपूज्य प्रा
गवत्सूर्यमंडलात् स्नानप्रकरणोक्तविधिना ती २
र्थमावाह्य मूलमंत्रेण जले संयोज्य शिखामंत्रेण
गालिनीमुद्रां प्रदर्शयामीति धेनुमुद्रयाऽमृती
कृत्य तत्र परशिवं ध्यात्वा गंधादिभिः संपूज्य मूले
नैकादशवारं अभिमंत्र्य मत्स्यमुद्रयाच्छादयेदिति
विशेषार्घ्यस्थापनं॥ ततः स्ववामे चतुरस्रं कृत्वा
कृ १ ताम्रकैशां स्थाप्य नम इति संपूज्य कलशस्येति

मंत्रेण तीर्थान्यावाह्य विशेषार्घजलेनात्मसहि
तं पूजासंभारं प्रोक्ष्य सर्वेपरं शिवमयं ध्यात्वा पू
र्ववल्लोचपाठं संपूज्य मूलमुच्चार्य श्रीपंशिवमूर्तिं र
कल्पयामीति यंत्रमध्ये बाणलिंगे वा मूर्तिं परिक
ल्प्य त्र्यंबकमिति वैदिकमंत्रांते श्रीमत्सेरशिवे इहा
गच्छागच्छ स्थावास्थ॥ ततः इहतिष्ठ॥ संनिधेहि॥
हे संनिरुद्धो भव॥ पूर्वोक्तषडंगमंत्रैः सकलीकृत्य
धेनुमुद्रयाऽमृतीकृत्य॥ परमीकुर्यात्॥ त्र्यंबकमं
त्रांते श्रीमत्सरशिवायउआसनं कल्पयामि नमः॥ प
ये वंश्रीमत्सरशिवाँ दंपाद्यं नमः॥ पादांबुजे पर्ययेत्॥
पाद्योत्तरं नाममंत्रेणैवाचमनीयं॥ श्रीमत्सरशिवा
येवाऽर्घः स्वाहा इति देवस्य मूर्ध्नि दद्यात्॥ इदमाच
मनीयं नमः मुखे॥ एषमधुपर्को नमः मुखे॥ केवल

२॥ जलेनैमाचमनीयं नमः॥ स्नानं॥ अत्र रुद्राभिषेकः
कार्य इति॥ स्नानानंतरमाचमनीयं॥ वस्त्रं नमः॥ व
स्त्रानंतरमाचमनीयं॥ तथैव यज्ञोपवीतं आचमनीयं॥ म
गंधं॥ नानाजातीयं पुष्पाणि बिल्वपत्राणि च॥ धू
मिति पं॥ दीपं॥ त्र्यंबकं मंत्रांते श्रीमत्सरमाशिवाय नैवेद्यं कल्प
यामि नमः इति नैवेद्ये जलं दद्यात्॥ ॐ अमृतोपस्तरणम उ
सि स्वाहेति देवमुखे जलं दत्वा पंचांगुलीभिः ॐ प्राणा
य स्वाहा॰ अपानाय॰ व्यानाय॰ उदानाय॰ समानाय स्वाहे
ति पंच प्राणाहुतीन् हुत्वा मूलमंत्रमष्टोत्तरवारं जप्त्वा नैवे
द्यांते अमृतापिधानमसि स्वाहेति देवमुखे जलं दत्वा पु
नराचमनीयं करोद्वर्तनादि॥ सकर्पूरं तांबूलं च दद्यात्॥
नमो हिरण्यबाहवे हिरण्यवर्णाये त्यादिमंत्रेण नमस्कारान्
नमस्ते अस्तु भगवन्विश्वेश्वराये त्यादिमंत्रेण प्रदक्षिणान्
कृत्वा॥ निधनपतये इत्यादिमंत्रेण श्रीमत्सरमशिवायेति पु
नेम म

प

ष्पांजलिं नमः॥ अथ आवरणपूजा॥ षट्कोणेषु पू
र्वादिं हृदयै नमः॥ मं। शिरसे स्वाहा॥ शिं। शिखायै व
षट्॥ वां। कवचाय हुं॥ यं। नेत्रत्रयाय वौषट्॥ नमः॥ शि
वाय अस्त्राय फट्॥ मूलमुच्चार्य॥ अभीष्टसिद्धिं मे देहि श अ४
रणागतवत्सल॥ भक्त्या समर्पये तुभ्यं प्रथमावरणा
र्चनमिति देवस्य चरणयोः पुष्पांजलिं दद्यादिति प्रथ
मावरणं॥१॥ अथ पंचदलेषु पूर्वादि ॐ सद्योजाताय
नमः॥ वामदेवाय। अघोराय। तत्पुरुषाय। ईशाना
य॥ अभीष्टसिद्धि मित्यादि द्वितीयावरणा
र्चनं॥२॥ अष्टपत्रेषु पूर्वादि ॐ अनंताय। सूक्ष्माय। अ५
शिवोत्तमाय। एकनेत्राय। एकरुद्राय। त्रिमूर्तये।
श्रीकंठाय। शिखंडिने नमः॥२॥ अभीष्टसि
द्धिमित्यादि तृतीयावरणार्चनमिति॥३॥ अष्टदलाग्रेषु उ
त्तरादि ॐ उमायै। चंडेश्वराय। नंदिने। महाकालाय। ग

उ१

णेशाय। वृषभाय। भृंगिरीटये। स्कंदाय नमः॥ अभीष्टसि
द्धिमित्यादि चतुर्थावरणार्चनं॥ तद्बाह्ये प्रसिद्धप्राच्याद्यष्ट
दिक्षु क्रमेण॥ ॐ लं इंद्राय नमः॥ रं अग्नये। यं यमाय। क्षं
निर्ऋतये। वं वरुणाय। सं वायवे। ठं सोमाय। हं ईशाना
य। निर्ऋतिवरुणयोर्मध्ये ह्रीं अनंताय॥ इंद्रेशानयोर्म
ध्ये ॐ ब्रह्मणे नमः॥ अभीष्टसिद्धिमित्यादि पंचमावर
णार्चनं॥५॥ इंद्रादीनां समीपेषु ॐ वज्राय। शक्तये। दंडाय। ख
ड्गाय। पाशाय। अंकुशाय। गदायै। त्रिशूलाय। चक्राय। पद्मा
य॥ पुष्पांजलिं गृहीत्वा॥ अभीष्टसिद्धिमित्यादि षष्ठावर
णपूजनं॥६॥ इत्यावरणार्चनं कृत्वा मूलमुच्चार्य सांगा
य सपरिवाराय श्रीसांबशिवाय गंधं नमः॥ पुष्पाणि न
